# श्रीगौर्यष्टोत्तरशतनामावलिः

श्रीस्वर्णगौर्यष्टोत्तरशतनामावलिः च ।

ॐ महामनोन्मणीशक्त्यै नमः ।

ॐ शिवशक्त्यै नमः ।

ॐ शिवंकर्यै नमः ।

ॐ इच्छाशक्ति क्रियाशक्ति ज्ञानशक्ति स्वरूपिण्यै नमः ।

ॐ शान्त्यतीत कलानन्दायै नमः ।

ॐ शिवमायायै नमः ।

ॐ शिवप्रियायै नमः ।

ॐ सर्वज्ञायै नमः ।

ॐ सुन्दर्यै नमः ।

ॐ सौम्यायै नमः । १०

ॐ सच्चिदानन्दरूपिण्यै नमः ।

ॐ परापरामय्यै नमः ।

ॐ बालायै नमः ।

ॐ त्रिपुरायै नमः ।

ॐ कुण्डल्यै नमः ।

ॐ शिवायै नमः ।

ॐ रुद्राण्यै नमः ।

ॐ विजयायै नमः ।

ॐ सर्वायै नमः ।

ॐ शर्वाण्यै नमः । २०

ॐ भुवनेश्वर्यै नमः ।

ॐ कल्याण्यै नमः ।

ॐ शूलिन्यै नमः ।

ॐ कान्तायै नमः ।

ॐ महात्रिपुरसुन्दर्यै नमः ।

ॐ मालिन्यै नमः ।

ॐ मानिन्यै नमः ।

ॐ मदनोल्लास मोहिन्यै नमः ।

ॐ महेश्वर्यै नमः ।

ॐ मातङ्ग्यै नमः । ३०

ॐ शिवकाम्यै नमः ।

ॐ चिदात्मिकायै नमः ।

ॐ कामाक्ष्यै नमः ।

ॐ कमलाक्ष्यै नमः ।

ॐ मीनाक्ष्यै नमः ।

ॐ सर्वसाक्षिण्यै नमः ।

ॐ उमादेव्यै नमः ।

ॐ महाकाल्यै नमः ।

ॐ सामायै नमः ।

ॐ सर्वजनप्रियायै नमः । ४०

ॐ चित्पुरायै नमः ।

ॐ चिद्‍घनानन्दायै नमः ।

ॐ चिन्मय्यै नमः ।

ॐ चित्स्वरूपिण्यै नमः ।

ॐ महासरस्वत्यै नमः ।

ॐ दुर्गायै नमः ।

ॐ ज्वालादुर्गादिमोहिन्यै नमः ।

ॐ नकुल्यै नमः ।

ॐ शुद्धविद्यायै नमः ।

ॐ सच्चिदानन्दविग्रहायै नमः । ५०

ॐ सुप्रभायै नमः ।

ॐ सुप्रभाज्वालायै नमः ।

ॐ इन्द्राक्ष्यै नमः ।

ॐ सर्वमोहिन्यै नमः ।

ॐ महेन्द्रजालमध्यस्थायै नमः ।

ॐ मायायै नमः ।

ॐ मायाविनोदिन्यै नमः ।

ॐ विश्वेश्वर्यै नमः ।

ॐ वृषारूढायै नमः ।

ॐ विद्याजालविनोदिन्यै नमः । ६०

ॐ मन्त्रेश्वर्यै नमः ।

ॐ महालक्ष्म्यै नमः ।

ॐ महाकालीफलप्रदायै नमः ।

ॐ चतुर्वेदविशेषज्ञायै नमः ।

ॐ सावित्र्यै नमः ।

ॐ सर्वदेवतायै नमः ।

ॐ महेन्द्राण्यै नमः ।

ॐ गणाध्यक्षायै नमः ।

ॐ महाभैरवपूजितायै नमः ।

ॐ महामायायै नमः । ७०

ॐ महाघोरायै नमः ।

ॐ महादेव्यै नमः ।

ॐ मलापहायै नमः ।

ॐ महिषासुरसंहार्यै नमः ।

ॐ चण्डमुण्डकुलान्तकायै नमः ।

ॐ चक्रेश्वर्यै नमः ।

ॐ चतुर्वेद्यै नमः ।

ॐ सर्वदायै नमः ।

ॐ सुरनायिक्यै नमः ।

ॐ षट्शास्त्रनिपुणायै नमः । ८०

ॐ नित्यायै नमः ।

ॐ षड्दर्शनविचक्षणायै नमः ।

ॐ कालरात्र्यै नमः ।

ॐ कलातीतायै नमः ।

ॐ कविराजमनोहरायै नमः ।

ॐ शारदातिलकाकारायै नमः ।

ॐ धीरायै नमः ।

ॐ धीरजनप्रियायै नमः ।

ॐ उग्रतारायै नमः ।

ॐ महामार्यै नमः । ९०

ॐ क्षिप्रमार्यै नमः ।

ॐ रणप्रियायै नमः ।

ॐ अन्नपूर्णेश्वर्यै नमः ।

ॐ मात्रे नमः ।

ॐ स्वर्णाकारतटित्प्रभायै नमः ।

ॐ स्वरव्यंजनवर्णोदयायै नमः ।

ॐ गद्यपद्यादिकारणायै नमः ।

ॐ पदवाक्यार्थनिलयायै नमः ।

ॐ बिन्दुनादादिकारणायै नमः ।

ॐ मोक्षेशमहिष्यै नमः । १००

ॐ सत्यायै नमः ।

ॐ भुक्तिमुक्तिफलप्रदायै नमः ।

ॐ विज्ञानदायिन्यै नमः ।

ॐ प्रज्ञायै नमः ।

ॐ प्रज्ञानफलदायिन्यै नमः ।

ॐ अहंकारकलातीतायै नमः ।

ॐ पराशक्त्यै नमः ।

ॐ परात्परायै नमः । १०८

इति श्रीस्वर्णगौर्यष्टोत्तरशतनामावलिः ॥

ललिताम्बिकादिव्याष्टोत्तरशतनामावली

शिवकामसुन्दर्यम्बाष्टोत्तरशतनामावलिः

**Download All Type PDF: https://pdfseva.com/**